# 2022

## SANSKRIT — HONOURS

**Paper : CC-4**

**[Self Management in the Gītā]**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

MURALIDHAR GIRLS' COLLEGE
LIBRARY

**Section – A**

**Unit – I**

**(Marks : 30)**

1. अधस्तनेषु ***दश प्रश्नाः*** समाधेयाः (**संस्कृतभाषया देवनागरलिप्या च**)। 2×10

(a) श्रीमद्भगवद्गीतायाः प्रथमतृतीयाध्याययोः नामसमुद्देशं करणीयम्।

(b) 'ममैवांशो जीवलोके' इत्यत्र ममेति पदेन कस्य परिचयः प्राप्यते? 'ममैवांशो' इत्यस्मिन् पदे 'अंश'शब्देन को बोध्यः?

(c) कः कान् आश्रित्य विषयान् उपसेवते?

(d) त्वचो विषयः कः भवति? श्रोत्रस्य कः विषयः?

(e) इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥
–श्लोकेनात्र प्रथमंस्तावत् यत्तत्त्वमवगम्यते स्वकीयया भाषया तल्लिख्यताम्।

(f) 'अहङ्कार इतीयं मे' इत्यत्र 'मे' इति पदेन को बोध्यः? 'भिन्ना प्रकृतिरष्टधा' कश्चात्र वक्ता?

(g) 'भूमिरापोऽनल' इत्यस्य 'प्रकृतिरष्टधा' इत्यस्य च विच्छेदः क्रियताम्।

(h) 'वायुः खं मनो बुद्धिरेव च' इत्यत्र खमिति शब्दस्य पर्यायशब्दो लिख्यताम्। 'नो बुद्धिरेव च' इत्यत्र 'मनो' इति पदस्य मूलशब्दः कोऽस्ति?

(i) 'भिन्ना प्रकृतिरष्टधा' इत्यंशे 'भिन्ना' इति पदे को धातुः कश्चात्र प्रत्ययः?

(j) कति गुणाः प्रकृतिसम्भवाः? के च ते?

(k) 'प्रकृतिः' इति शब्दः पुंलिङ्गवाचक उत स्त्रीलिङ्गवाचकः? 'निबध्नन्ति महाबाहो' इत्यत्र 'महाबाहो' इति पदेन को बोध्यः?

(l) 'देहे देहिनमव्ययम्' इत्यत्र देहिनमितिपदेन को बोध्यः? कश्चात्र मूलशब्दः देहिनमिति शब्दस्य?

2. निम्नलिखितयो**रेकस्य सुरभाषया देवनागरलिप्या** च व्याख्या कार्या। 6×1

(a) सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।
ज्ञानं यदा तदा विद्याद् विवृद्धं सत्त्वमित्युत॥

(b) रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निवध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥

3. (a) यथेच्छ**मेकस्य** विग्रहवाक्यं प्रदाय **सुरभाषया देवनागरलिप्या** च समासनाम लिख्यताम्। 2×1

(i) 'सर्वद्वारेषु' 2(a) प्रश्ने।

(ii) 'तृष्णासङ्गसमुद्भवम्' 2(b) प्रश्ने।

(b) कस्य**चिदेकस्य** सन्धिविच्छेदः कार्यः। 1×1

(i) देहेऽस्मिन् 2(a) प्रश्ने।

(ii) सत्त्वमित्युत 2(a) प्रश्ने।

MURALIDHAR GIRLS' COLLEGE
LIBRARY

(c) कस्य**चिदेकस्य** व्युत्पत्तिः निर्णेया। 1×1

(i) विद्याद् 2(a) प्रश्ने।

(ii) विद्धि 2(b) प्रश्ने।

**Section – B**

**Unit – III**

**(Marks : 15)**

4. निम्नलिखितयोः ***कस्यचिदेकस्य*** उत्तरं प्रदेयम्।

(a) 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति कमुद्दिश्येयमुक्तिः? कथं ज्ञानेन सदृशं पवित्रमिह नहीति सम्यगालोच्यताम्। 2+8

(b) कः ज्ञानं लभते? 'ज्ञानं लब्ध्वा अचिरेण परां शान्तिं लभते' इत्याशयः स्पष्टीक्रियताम्। 2+8

5. अधोलिखितयोः ***कस्यचिदेकस्य*** आङ्गलभाषया वङ्गभाषया वा अनुवादः कार्यः। 5×1

(a) यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥

(b) प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥

## Section – C

### Unit – I

**(Marks : 20)**

6. निम्नलिखितेषु ***द्वयमवलम्ब्य*** टीका लेखनीया। 5×2

श्रद्धा, योगः, ज्ञानम्।

7. निम्नलिखितयोः ***कस्यचिदेकस्य*** उत्तरं देयम्।

(a) "शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्" – कस्मिन् अध्याये वर्तते अयं श्लोकांशः? अत्र को वक्ता? को वा श्रोता? वचनस्यास्य तात्पर्यं सविस्तरम् आलोचनीयम्। 1+1+1+7

(b) "समः शत्रौ च मित्रे च तथा मानापमानयोः" वचनस्यास्य तात्पर्यव्याख्या कार्या। 10

MURALIDHAR GIRLS' COLLEGE
LIBRARY